# संस्कृत-वार्ता:

**दिनाङ्क :-25.07.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**संसद: केन्द्रीयवित्त संकल्पना पत्रम्**

संसद: उभयो: सदनयो: केन्द्रीयवित्त संकल्पना पत्रम् निधाय विषये चर्चा समनुष्ठिता। लोकसभायां राज्यसभायां च अस्य वित्तीयवर्षस्य केन्द्र-शासित-जम्मू-कश्मीरस्य आयव्ययकस्य विषये अपि युगपदेव चर्चा जाता ।

राज्यसभायां चर्चायाः आरम्भे काङ्ग्रेस्-पक्षस्य सांसदः पी. चिदम्बरम: वृत्याभाव- मुद्रास्फिति-विषयान् च उत्थापयत्। सः अवदत् यत्, उत्पादनसम्बद्ध-प्रोत्साहन-योजना देशे पर्याप्त-कार्यस्थानानि न कल्पयति इति वदन् असौ अकथयत् वृत्याभाव: एव बृहत्तमा समस्या अस्ति। तत्रैव वित्तमन्त्रिणा निर्मला-सीतारामन्-वर्यया वित्तसङ्कल्पना-प्रपत्रे कैश्चित् राज्यैः सह भेदभावस्य प्रख्यापिताः आरोपाः निरस्तीकृताः। ह्य: राज्यसभायां शून्यकालावधौ तया आरोपः प्रख्यापितः यत् कांग्रेस्-दलस्य नेतृत्वे अन्यैः विपक्षिदलैः भ्रामकसूचना-प्रसारणस्य सततं प्रयासः क्रियते यत् विपक्षिदलानां राज्यैः वित्तसङ्कल्पना-प्रपत्रे किमपि न प्राप्तम् । तया प्रोक्तं यत् कस्मिन्नपि वित्तसङ्कल्पना-प्रपत्रे सर्वेषां राज्यानां पृथक्-नामोच्चारणं नैव कर्तुं शक्यते।

**रेलमन्त्री**

रेलमन्त्री अश्विनीवैष्णव: प्रोक्तवान् यत् रेल-वित्तसंकल्पनाप्रपत्रे एक: महत्वपूर्णभाग: रेलयानानां सुरक्षां संवर्धयितुम् आवण्टित:। ह्य: नवदिल्ल्यां श्रीवैष्णव: इमां सूचनाम् अभिव्यक्तवान्। अग्रे असौ प्रत्यपादयत् यत् भूयोऽपि द्विषष्टिसहस्राधिकद्विलक्ष कोटिरूप्यकाणां समग्र-वित्त-पत्रके एकलक्षकोटिरूप्यकाणि रेलसम्बद्धसुरक्षायै संस्थापितानि। रेलमन्त्री पुन: प्रकाशितवान् यत् पञ्जाबराज्याय सप्तचत्वारिंशदधिकैकशतोत्तर-पञ्चसहस्रकोटिरूप्यकाणि आवण्टितानि राजस्थानराज्याय च नवपञ्चाशदधिक-नवशतोत्तरनवसहस्रकोटिरूप्यकाणि समुद्घोषितानि यानि यूपीएप्रशासनस्य चतुर्दशगुणमधिकमस्ति।

**सर्वोच्चन्यायालय:-जनन्यायालय:**

विलम्बितानां प्रकराणां सौहार्दपूर्णं समाधानं समाधातुं एकस्मिन् महत्वपूर्ण-पदक्षेपे, सर्वोच्चन्यायालयः जुलाईमासस्य नवविंशति-दिनाङ्कादारभ्य अगस्तमासस्य तृतीयदिनाङ्कं यावत् विशिष्ट-लोकन्यायालयस्य आयोजनं करिष्यति। भारतस्य मुख्य-न्यायाधीशेन डी. वाई. चंद्रचूड़ेन नागरिकाः अस्य कार्यक्रमस्य लाभः समावाप्तुं प्रार्थिताः सन्ति येषां प्रकरणानि शीर्षन्यायालये चिर-विलम्बितानि सन्ति ।

## ऋतुविज्ञान-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन पूर्वानुमानितं यत् गुजरात-कोंकण-गोवा-मध्यमहाराष्ट्र-राज्येषु अतिवृष्टिः सततं भविष्यति। विभागेन पुनः सूचितं यत् पञ्चदिवसानां काले हिमाचलप्रदेश-उत्तराखण्ड-जम्मूकश्मीर-लद्दाख-पञ्जाब-हरियाणा-उत्तरप्रदेश-राजस्थान-केरल-तेलङ्गाना-तमिलनाडु-राज्येष्वपि मध्यमस्तरीया वृष्टिः सम्भाविता वर्तते।

## बिहार - विधेयकम्

बिहारविधानसभा प्राशासनिकप्रतियोगिता-परीक्षासु प्रश्नपत्राणां अवैधोद्घाटनं, अनियमितताः च विरुध्य एकं विधेयकं पारितम् अकरोत्। बिहार-सार्वजनिक-परीक्षा-विधेयकं, इत्यस्य अन्तर्गतं वर्षत्रयात् समारभ्य दशवर्षाणि पर्यन्तं कारावासदण्डम् गभीरप्रकरणेषु एककोटिरुप्यकाणाम् अर्थदण्डं च प्रस्ताविते स्तः। अस्य विधेयकस्य उद्देश्यं परीक्षायोजकेषु सार्वजनिकेषु निकायेषु मेधाविछात्राणां अन्यप्रत्याशिनां च विश्वासवर्धनम् अस्ति।

## क्रिकेट

महिलैशियाचषकक्रिकेटप्रतिस्पर्धायाम्, बाङ्ग्लादेशदलेन मलेशियादलं ह्यः चतुर्दशाधिकैकशतं धावनाङ्कैः पराजित्य उपान्त्यचक्रं सम्प्राप्तम्। ध्यातव्यमस्ति यत् शुक्रवासरे द्वितीयम् उपान्त्यचक्रं श्रीलङ्कापाकिस्तानदलयोर्मध्ये अपि च प्रथमं उपान्त्यद्वन्द्वं भारत-बाङ्ग्लादेशदलयोर्मध्ये क्रीडिष्यते।

**॥इति वार्ताः॥**